दिनाङ्क :- 17.04.2025

प्रात: - 06:55

## सर्वोच्चन्यायालयः-वक्फसंशोधनम्

सर्वोच्चन्यायालयः पञ्चविंशत्यधिक-द्विसहस्र-तमवर्षीयं वक्फ-संशोधन-अधिनियमम् अधिकृत्य स्वकीयाम् अल्पाधिकयाचिकाम् तदा स्थगितवान् यदा केन्द्रेण पीठेन एकेन च उत्थापितेषु त्रिषु प्रमुखेषु प्रश्नेषु उत्तरार्थम् अधिकः समयः याचितः। मुख्यन्यायाधीशस्य सञ्जीवखन्ना इत्येतस्य न्यायमूर्तिनोः पीवी सञ्जयकुमार-केवी विश्वनाथन इत्यनयोः त्रयाणां न्यायाधीशानाम् एकेन पीठेन मिलित्वा अस्य विधेयकस्य विरोधं कुर्वतां याचिकानां समूहस्य विचारणां कुर्वता आसीत्। अयं प्रसङ्गः अद्य मध्याह्ने द्विवादने त्रयाणां न्यायाधीशानां पीठस्य सम्मुखे पुनरेकवारं समारप्स्यते।

जनरल् तुषार् मेहता इत्येषः पृष्टवान् यत्, कथं "उपयोत्रा वक्फ् इत्यस्य अनुमतिं निराकर्तुं शक्यते, यतोहि वक्फ् इत्यस्य पञ्जीकरणार्थं आवश्यकपत्राणि न भविष्यन्ति।" विचारणायाः अन्ते च खन्ना इत्ययं वक्फ्-अधिनियमस्य संशोधनानां विरुद्धं पश्चिमबङ्गालराज्ये उद्भूतायाः हिंसायाः विषये चिन्तां प्रकटितवान्।

## प्रवर्तन-निदेशालयः

प्रवर्तन-निदेशालयेन हरियाणाराज्ये रॉबर्टवाड्रा इत्येषः एकेन भूमि-सम्बद्धेन धनशोधन-प्रकरणस्य निरीक्षणस्य प्रसङ्गे ह्यः नैरन्तर्येण द्वितीये दिवसेऽपि परिपृच्छार्थम् समाहूतः। रॉबर्टवाड्रा-इत्यमुना साकं परिपृच्छा नवदिल्लीस्थिते प्रवर्तन-निदेशालय-कार्यालये जाता। अभिकरणेन अनेन श्वः पुनः परिपृच्छार्थम् अयम् आहूतः। प्रकरणमिदम् श्रीवाड्रा इत्येतस्य उद्योगद्वारा गुरूग्रामे भूमिक्रयणेन सम्बद्धं वर्तते।

**गोयलः**

**केन्द्रीय-वाणिज्योद्योगमन्त्री पीयूष-गोयलः कथितवान् यत् भारतम् एकम् उदीयमानम् आपणम् वर्तते तथा च विश्वस्य द्रुतगत्या संवर्धमाना अर्थव्यवस्थापि विद्यते। ह्यः नवदिल्ल्यां पञ्चविंशत्यधिक-द्विसहस्रतमवर्षे भारत-मध्य-पूर्व-यूरोपार्थिकवीथी-सम्मेलनम् सम्बोधयता मन्त्रिणा इदं निगदितम्। श्रीगोयलेन अग्रे प्रोक्तं यत् प्रशासनं तैः देशैः सह भारतस्य व्यापारिक-सम्बन्धान् विस्तारयति यत्रतः उचितमूल्यम् अस्मै मिलति इति। अयं हि अग्रे प्रावोचत् यत् प्रशासनं तत्रापि तैः देशैः सह सम्बन्धान् सुदृढयति यत्र इदं प्रशासनं न्यायसङ्गतं समन्वययुतं मुक्तव्यापारसहभागित्वं स्थापयितुं शक्नोतीति।**

**सोनोवालः**

**केन्द्रीय-जलपोत-जलमार्ग-मन्त्री सर्बानन्द-सोनोवालः प्रबलतया प्रोक्तवान् यत् जलपोतस्थानकानाम् बहुविधपरिवहनानाम् आङ्कीकीय-मञ्चानां यथा मैत्री-इत्येतस्य विकासेन सह भारतेन आधुनिकी क्रान्ति अग्रे नीयते। नवदिल्ल्यां ह्यः पञ्चविंशत्यधिक-द्विसहस्रतमवर्षीयं भारत-मध्य-पूर्व-यूरोप-आर्थिक-वीथी-सम्मेलनं सम्बोधयन् श्रीसोनोवालः दृढीकृतवान् यत् इदं सम्मेलनम् वैश्विक-सम्पर्क-सौविध्याय क्रीडापरिवर्तकत्वेन गव्यते।**

**मुख्यन्यायाधीशः**

**भारतस्य मुख्यन्यायाधीशेन सञ्जीवखन्ना-इत्येतेन आगामिनः मुख्यन्यायाधीशस्य रूपेण न्यायमूर्तिनः बी.आर.गवई-इत्येतस्य नाम्नः अनुशंसा कृता। न्यायमूर्तिः गवई-इत्येषः सर्वोच्चन्यायालयस्य द्वितीयः वरिष्ठतमः न्यायाधीशो वर्तते। तस्य च नाम्नः अनुशंसा केन्द्रीय-विधि-मन्त्रालयाय कृतास्ति। वर्तमानस्य मुख्यन्यायाधीशस्य न्यायमूर्तिनः सञ्जीवखन्ना इत्यस्य कार्यकालः मईमासे त्रयोदशदिनाङ्के अवसीयते।**

**ओम् बिरला**

**लोकसभाध्यक्षः ओम् बिरला अवदत् यत् सप्तचत्वारिंशदधिकद्विसहस्र- वर्षपर्यन्तं भारतं पूर्णतया विकसितराष्ट्ररूपेण परिवर्तयितुं भारतीयनेतृत्वस्य दृढप्रतिबद्धतायाम् उद्योगस्य वाणिज्यस्य च स्तम्भानां महत्त्वपूर्णं स्थानं वर्तते इति।**

**आई.पी.एल.**

**इण्डियन-प्रीमियर-लीग- इत्येतस्यां विंशतिप्रतिविंशति क्रिकेट स्पर्धा-मालिकायां ह्यः रात्रौ क्रीडिते द्वन्द्वे दिल्ल्याः अरूणजेटली-क्रिकेट-क्रीडाङ्गणे डेल्ही-कैपिटल्स-दलेन राजस्थान-रॉयल्स-दलं पराभूतम्। अपरत्र अद्य मुम्बय्याः वानखेड़े-क्रिकेट-क्रीडाङ्गणे मुम्बई-इण्डियन्स-सनराइजर्स-हैदराबाद-दलयोः मध्ये द्वन्द्वं भविष्यति। प्रतिस्पर्धा एषा सार्धसप्तवादनतो क्रीडिष्यते।**